अनामय स्तोत्रं

अनामय स्तोत्रं

तृष्णातंत्रे मनसि तमसा दुर्दिने बंधुवर्ती
मादृग्जंतुः कथमधिकरोत्यैश्वरं ज्योतिरग्र्यं |
वाचः स्फीता भगवति हरेस्सन्निकृष्टात्मरूपा-
स्स्तुत्यात्मानस्स्वयमिवमुखादस्य मे निष्पतंति || 1 ||

वेधा विष्णुर्वरुणधनदौ वासवो जीवितेश-
श्चंद्रादित्यौ वसव इति या देवता भिन्नकक्ष्याः |
मन्ये तासामपि न भजते भारती ते स्वरूपं
स्थूले त्वंशे स्पृशति सदृशं तत्पुनर्मादृशोऽपि || 2 ||

तन्नस्थाणोस्स्तुतिरतिभरा भक्तिरुच्चैर्मुखी चे-
द्ग्राम्यस्तोता भवति पुरुषः कश्चिदारण्यको वा |
नो चेद्भक्तिस्त्वयि च यदि वा ब्रह्मविद्यात्वधीते
नानुध्येयस्तव पशुरसावात्मकर्मानभिज्ञः || 3 ||

विश्वं प्रादुर्भवति लभते त्वामधिष्ठायकं चे-
न्नेह्युत्पत्तिर्यदि जनयिता नास्ति चैतन्ययुक्तः |
क्षित्यादीनां भव निजकलावत्तया जन्मवत्ता
सिध्यत्येवं सति भगवतस्सर्वलोकाधिपत्यं || 4 ||

भोग्यामाहुः प्रकृतिमृषयश्चेतनाशक्तिशून्यां
भोक्ता चैनां परिणमयितुं बुद्धिवर्ती समर्थः |
भोगोप्यस्मिन् भवति मिथुने पुष्कलस्तत्र हेतु-
र्नीलग्रीव त्वमसि भुवनस्थापनासूत्रधारः || 5 ||

भिन्नावस्थं जगति बहुना देशकालप्रभेदा-
द्द्वाभ्यां पापान्यभिगिरि हरन् योनवद्यः क्रमाभ्यां |
प्रेक्ष्यारूढस्सृजति नियमादस्य सर्वं हि यत्त-
त्सर्वज्ञत्वं त्रिभुवन सृजा यत्र सूत्रं न किंचित् || 6 ||

चारूद्रेके रजसि जगतां जन्मसत्वे प्रकृष्टे
यात्रां भूयस्तमसि बहुले बिभ्रतस्संहृतिं च |
ब्रह्माद्यैतत्प्रकृतिगहनं स्तंभपर्यंतमासी-
त्क्रीडावस्तु त्रिनयन मनोवृत्तिमात्रानुगं ते || 7 ||

कृत्तिश्चित्रा निवसनपदे कल्पिता पौंडरीकी
वासागारं पितृवनभुवं वाहनं कश्चिदुक्षा |
एवं प्राहुः प्रलघुहृदया यद्यपि स्वार्थपोषं
त्वां प्रत्येकं ध्वनति भगवन्नीश इत्येष शब्दः || 8 ||

क्लृप्ताकल्पः किमयमशिवैरस्थिमुख्यैः पदार्थैः
कस्स्यादस्य स्तनकलशयोर्भारनम्रा भवानी |
पाणौ खंडः परशुरिदमप्यक्षसूत्रं किमस्ये-
त्या चक्षाणो हर कृतधियामस्तु हास्यैकवेद्यः || 9 ||

यत्कापालव्रतमपि महद्दृष्टमेकांतघोरं
मुक्तेरध्वा स पुनरमलः पावनः किं न जातः |
दाक्षायण्यां प्रियतमतया वर्तते योगमाया
सा स्याद्धत्ते मिथुनचरितं वृद्धिमूलं प्रजानां || 10 ||

कश्चिन्मर्त्यः क्रतुकृशतनुर्नीलकंठ त्वया चे-
द्दृष्टिस्निग्धस्स पुनरमरस्त्रीभुजग्राह्यकंठः |
अप्यारूढस्सुरपरिवृतं स्थानमाखंडलीयं
त्वं चेत्क्रुद्धस्स पतति निरालंबनो ध्वांतजाले || 11 ||

शश्वद्बाल्यं शरवणभवं षण्मुखं द्वादशाक्षं
तेजो यत्ते कनकनलिनीपद्मपत्रावदातं |
विस्मार्यंते सुरयुवतयस्तेन सेंद्रावरोधा
दैत्येंद्राणामसुरजयिनां बंधनागारवासं || 12 ||

वेगाकृष्टग्रहरविशशिव्यश्रुवानं दिगंता-
न्न्यक्कुर्वाणं प्रलयपयसामूर्मिभंगावलेपं |
मुक्ताकारं हर तव जटाबद्धसंस्पर्शि सद्यो
जज्ञे चूडा कुसुमसुभगं वारि भागीरथीयं || 13 ||

कल्माषस्ते मरकतशिलाभंगकांतिर्न कंठे
न व्याचष्टे भुवनविषयां त्वत्प्रसादप्रवृत्तिं |
वारां गर्भस्सहि विषमयो मंदरक्षोभजन्मा
नैवं रुद्धो यदि न भवति स्थावरं जंगमं वा || 14 ||

संधायास्त्रं धनुषि नियमोन्माथि सम्मोहनाख्यं
पार्श्वे तिष्ठन् गिरिशसदृशे पंचबाणो मुहूर्तं |
तस्मादूर्ध्वं दहनपरिधौ रोषदृष्टि प्रसूते
रक्ताशोकस्तबकित इव प्रांतधूमद्विरेफः || 15 ||

लंकानाथं लवणजलधिस्थूलवेलोर्मिदीर्घैः
कैलासं ते निलयनगरीं बाहुभिः कंपयंतं |
आक्रोशद्भिर्वमितरुधिरैराननैराप्लुताक्षै-
रापातालानयदलसाबद्धमंगुष्ठकर्म || 16 ||

ऐश्वर्यं तेऽप्यवृणतपतन्नेकमूर्धावशेषः
पादद्वंद्वे दशमुखशिरः पुंडरीकोपहारः |
येनैवासावधिगतफलो राक्षसश्रीविधेय-
श्चक्रे देवासुरपरिषदो लोकपालैकशत्रुः || 17 ||

भक्तिर्बाणा सुरमपि भवत्पादपद्मं स्पृशंतं
स्थानं चंद्राभरण गमयामास लोकस्य मूर्ध्नि |
सह्यस्यापि भ्रुकुटिनयनादग्निदंष्ट्राकरालं
द्रष्टुं कश्चिद्वदनमशकद्देवदैत्येश्वरेषु || 18 ||

पादन्यासान्नमति वसुधा पन्नगस्कंधलग्ना
बाहुक्षेपाद्ग्रहगणयुतं घूर्णते मेघबृंदं |
उत्साद्यंते क्षणमिव दिशो हुंकृतेनातिमात्रं
भिन्नावस्थं भवति भुवनं त्वय्युपक्रांतनृत्ते || 19 ||

नोर्ध्वं गम्यं सरसिजभुवो नाप्यधश्शार्ङ्गपाणे-
रासीदंतस्तव हुतवहस्तं भमूर्त्या स्थितस्य |
भूयस्ताभ्यामुपरि लघुना विस्मयेन स्तुवद्भ्यां
कंठे कालं कपिलनयनं रूपमाविर्बभूव || 20 ||

श्लाघ्यां दृष्टिं दुहितरि गिरेर्न्यस्य चापोर्ध्वकोट्यां
कृत्वा बाहुं त्रिपुरविजयानंतरं ते स्थितस्य |
मंदाराणां मधुरसुरभयो वृष्टयः पेतुरार्द्रा-
स्स्वर्गोद्यानभ्रमरवनितादत्तदीर्घानुयाताः || 21 ||

उद्धृत्यैकं नयनमरुणं स्निग्धतारापरागं
पूर्णेथाद्यः परमसुलभे दुष्कराणां सहस्रे |
चक्रं भेजे दहनजटिलं दक्षिणं तस्य हस्तं
बालस्येव द्यूतिवलयितं मंडलं भास्करस्य || 22 ||

विष्णुश्चक्रे करतलगते विष्टपानां त्रयाणां
दत्ताश्वासो दनुसुतशिरश्छेददीक्षां बबंध |
प्रत्यासन्नं तदपि नयनं पुंडरीकानुकारि
श्लाघ्या भक्तिस्त्रिनयन भवत्यर्पिता किं न सूते || 23 ||

सव्ये शूलं त्रिशिखमपरे दोष्णि भिक्षाकपालं
सोमो मुग्धश्शिरसि भुजगः कश्चिदंसोत्तरीयः |
कोऽयं वेषस्त्रिनयन कुतो दृष्ट इत्यद्रिकन्या
प्रायेण त्वां हसति भगवन् प्रेमनिर्यंत्रितात्मा || 24 ||

आर्द्रं नागाजिनमवयवग्रंथिमद्विभ्रदंसे
रूपं प्रावृड्घनरुचिमहाभैरवं दर्शयित्वा |
पश्यन् गौरीं भयचल करालंबित स्कंधहस्तां
मन्ये प्रीत्या दृढ इति भवान् वज्रदेहेऽपि जातः || 25 ||

व्यालाकल्पा विषमनयना विद्रुमाताम्रभासो
जायामिश्रा जटिलशिरसश्चंद्ररेखावतंसाः |
नित्यानंदा नियतललितास्स्निग्धकल्माषकंठाः
देवा रुद्रा धृतपरशवस्ते भविष्यंति भक्ताः || 26 ||

मंत्राभ्यासो नियमविधयस्तीर्थयात्रानुरोधो
ग्रामे भिक्षाचरणमुटजे बीजवृत्तिर्वने वा
इत्यायासे महति रमतामप्रगल्भः फलार्थे
स्मृत्वेवाहं तवचरणयोर्निर्वृतिं साधयामि || 27 ||

आस्तां तावत्स्नपनमुपरिक्षीरधाराप्रवाहै-
स्स्नेहाभ्यंगो भवनकरणं गंधधूपार्पणं वा |
यस्ते कश्चित्किरति कुसुमान्युद्दिशन् पादपीठं
भूयो नैष भ्रमति जननीगर्भकारागृहेषु || 28 ||

मुक्ताकारं मुनिभिरनिशं चेतसि ध्यायमानं
मुक्तागौरं शिरसिजटिले जाह्नवीमुद्वहंतं |
नानाकारं नवशशिकलाशेखरं नागहारं
नारीमिश्रं धृतनरतिरोमाल्यमीशं नमामि || 29 ||

तिर्यग्योनौ त्रिदशनिलये मानुषे राक्षसे वा
यक्षावासे विषधरपुरे देव विद्याधरे वा |
यस्मिन् कस्मिंत्सुकृतनिलये जन्मनि श्रेयसे वा
भूयाद्युष्मच्चरणकमलध्यायिनी चित्तवृत्तिः || 30 ||

वंदे रुद्रं वरदममलं दंडिनं मुंडधारिं
दिव्यज्ञानं त्रिपुरदहनं शंकरं शूलपाणिं |
तेजोराशिं त्रिभुवनगुरुं तीर्थमौलिं त्रिनेत्रं
कैलासस्थं धनपतिसखं पार्वतीनाथमीशं || 31 ||

योगी भोगी विषभुगमृतश्शस्त्रपाणिः तपस्वी
शांतः क्रूरः शमितविषयः शैलकन्यासहायः |
भिक्षावृत्तिस्त्रिभुवनपतिः शुद्धिमानस्थिमाली
शक्यो ज्ञातुं कथमिव शिव त्वं विरुद्धस्वभावः || 32 ||

उपदिशती यदुच्चैर्ज्योतिराम्नायविद्यां
परम परमदूरं दूरमाद्यंतशून्यां |
त्रिपुरजयिनी तस्मिन् देवदेवे निविष्टां
भगवति परिवर्तोन्मादिनी भक्तिरस्तु || 33 ||

इति विरचितमेतच्चारुचंद्रार्धमौले-
र्ललितपदमुदारं दंडिना पंडितेन |
स्तवनमवनकामेनात्मनोऽनामयाख्यं
भवति विगतरोगो जंतुरेतज्जपेन || 34 ||

स्तोत्रं सम्यक्परमविदुषा दंडिना वाच्यवृत्ता-
न्मंदाक्रांतान् त्रिभुवनगुरोः पार्वतीवल्लभस्य |
कृत्वा स्तोत्रं यदि सुभगमाप्नोति नित्यं हि पुण्यं
तेन व्याधिं हर हर नृणां स्तोत्रपाठेन सत्यं || 35 ||

इति दंडिविरचितं अनामयस्तोत्रं |